Roll No Code No: 9175151

# Directorate of Distance Education
# Acharya First Year Annual Examination May, 2017
# Paper - 1, Dharmashastra

(याज्ञवल्क्यस्मृतेराचाराध्यायः-मिताक्षरासहितः)

**Time : 3 hrs.** **Max. Mark: 100**

**(Write answers in Answer booklet only)**

**I.** केचन पञ्च प्रश्नाः समाधेयाः । **5x20=100**

(१) धर्मस्य कारकहेतून् ज्ञापकहेतूंश्च प्रतिपाद्य धर्मशास्त्रप्रवर्त्तकान् निर्दिशत ।

(२) द्विजातीनामुपनयनकालान् विलिख्य तेषां दण्डाऽजिन-मेखलोपवीत-भिक्षाटनप्रकारान् प्रतिपादयत।

(३) सलक्षणं विवाहभेदान् प्रदर्श्य ऋतुकालान् निर्दिशत ।

(४) गृहस्थाश्रमस्य श्रेष्ठत्वं प्रतिपादयत ।

(५) स्नातकभेदान् प्रदर्श्य तद्धर्मान् लिखत ।

(६) भक्ष्याभक्ष्यविषये मिताक्षरोक्तं सर्वं विशदयत ।

(७) राज्ञो धर्मान् यथाग्रन्थं विवृणुत ।

(८) पार्वणश्राद्धस्य स्वरूपं कालश्चोल्लिख्य श्राद्धे वर्जितब्राह्मणान् निरूपयत ।

(९) यथाकामी भवेद्वापि स्त्रीणां वरमनुस्मरन्।

स्वदारनिरतश्चैव स्त्रियो रक्षा यतः स्मृता।। इति श्लोकं मिताक्षरादिशा व्याख्यात ।

(१०) स्वाम्यमात्या जनो दुर्गं कोशोदण्डस्तथैव च ।

मित्राण्येताः प्रकृतयो राज्यं सप्ताङ्गमुच्यते ।। इति श्लोकं सप्रसङ्गं व्याख्यात ।

**000**

Roll No Code No: 9175152

# Directorate of Distance Education
# Acharya First Year Annual Examination May, 2017
# Paper - 2, Dharmashastra

(कौटलीयार्थशास्त्रस्य प्रथमाधिकरणम्, गौतमधर्मसूत्रं सम्पूर्णम्)

**Time : 3 hrs. Max. Mark: 100**

**(Write answers in Answer booklet only)**

**विभागः – 'क', कौटलीयार्थशास्त्रम्**

**I. पञ्च प्रश्नाः समाधेयाः । 5x10=50**

(१) विद्याभेदान् विलिख्य त्रय्या वार्त्तायाश्च महत्त्वं प्रदर्शयत ।

(२) कौटलीयार्थशास्त्रानुसारेण वर्णधर्मानाश्रमधर्मांश्च प्रतिपादयत ।

(३) कौटलीयदिशा उपधाभिरमात्यानां शौचाशौचप्रकारं विवृणुत ।

(४) यथशास्त्रं निशान्तप्रणिधिं पर्यालोचयत ।

(५) यथाशास्त्रं दूतप्रणिधिं विचारयत ।

(६) स्वाधीतग्रन्थदिशा राजपुत्ररक्षणप्रकारं निर्दिशत ।

(७) कौटलीयदिशा गूढपुरुषोत्पत्तिं विवेचयत ।

(८) नास्य गुह्यं परे विद्युश्छिद्रं विद्यात् परस्य च ।
गूहेत् कूर्म इवाङ्गानि यत्स्याद् विवृतमात्मनः।। इत्युक्तेः यथार्थतां प्रतिपादयत ।

**विभागः – 'ख', गौतमधर्मसूत्रम्**

**II. त्रयः प्रश्नाः समाधेयाः । 3x10=30**

(१) गौतमोक्तब्रह्मचारिधर्मान् विचारयत ।

(२) गौतमोक्तदिशा आपद्धर्मान् प्रदर्शयत ।

(३) गौतमोक्तसंस्काराणां नामानि कालांश्च निर्दिशत ।

(४) यतिधर्मान् यथाग्रन्थं लिखत ।

(५) श्राद्धेऽभोज्यान्नान् गौतमोक्तदिशा विवेचयत ।

**III. द्वौ प्रश्नौ समाधेयौ । 2x10=20**

(१) सुरापानप्रायश्चित्तं गौतमानुसारेण विचारयत ।

(२) गौतमधर्मसूत्रानुसारेण राज्ञः कर्त्तव्यानि विशदयत ।

(३) कानि द्रव्याणि भक्ष्याणि कानि चाऽभक्ष्याणीति गौतमोक्तदिशा प्रतिपादयत ।

(४) गौतमोक्तदिशा पितृधनविभागप्रकारं विवृणुत ।

**000**

Roll No Code No: 9175153

# Directorate of Distance Education
# Acharya First Year Annual Examination May, 2017
# Paper - 3, Dharmashastra

(मीमांसापरिभाषा कृष्णयज्वकृता, कमलाकरभट्टकृतनिर्णयसिन्धोः प्रथमपरिच्छेदः)

**Time : 3 hrs.** **Max. Mark: 100**

**(Write answers in Answer booklet only)**

**विभागः – 'क', मीमांसापरिभाषा**

**I. पञ्च प्रश्नाः समाधेयाः । 5x10=50**

(१) धर्माधर्मयोः स्वरूपं प्रदर्श्य ब्राह्मणवाक्यान्युदाहरत ।

(२) विधिभेदान् प्रदर्श्य सोदाहरणं परिसंख्याविधिं विचारयत ।

(३) अर्थवादानां स्वरूपं भेदांश्च सोदाहरणं प्रतिपादयत ।

(४) मन्त्राणां स्वरूपमुपयोगश्च यथाग्रन्थं प्रदर्शयत ।

(५) भावनायाः स्वरूपं भेदश्च विलिख्य आर्थीभावनायाः अंशत्रयं विवृणुत ।

(६) स्वाधीतग्रन्थदिशा संज्ञया कर्मभेदं सोदाहरणं प्रतिपादयत ।

(७) अपूर्वस्य स्वरूपं भेदांश्च यथाग्रन्थं विवेचयत ।

(८) अङ्गत्वबोधकप्रमाणानां नियामकत्वं सोदाहरणं प्रदर्शयत ।

**विभागः – 'ख', निर्णयसिन्धौ प्रश्नाः**

**II. त्रयः प्रश्नाः समाधेयाः । 3x10=30**

(१) अब्दायनर्तुमासपक्षाणां स्वरूपं भेदानुपयोगांश्च निरूपयत ।

(२) युग्मवाक्यस्य स्वरूपमुल्लिख्य व्याख्याय च तस्योपयोगं प्रदर्शयत ।

(३) मलमासस्य स्वरूपं भेदश्च प्रदर्श्य तत्र वर्ज्यावर्ज्यं विवेचयत ।

(४) संक्रान्तीनां नामान्युल्लिख्य तासां पुण्यकालान् लिखत ।

(५) व्रतस्य स्वरूपं विचार्य स्त्रीव्रते विशेषं निर्दिशत ।

**III. द्वौ प्रश्नौ समाधेयौ । 2x10=20**

(१) खर्वादिवाक्यस्य स्वरूपमुपयोगश्च प्रतिपादयत ।

(२) एकादश्या अष्टादशभेदान् प्रदर्शयत ।

(३) ग्रहणे भोजननिषेधव्यवस्थां निर्दिशत ।

(४) इष्टेः कालं निरूपयत ।

**000**

Roll No Code No: 9175154

# Directorate of Distance Education
# Acharya First Year Annual Examination May, 2017
# Paper - 4, Dharmashastra

(जीमूतवाहनकृतो दायभागः)

**Time : 3 hrs.** **Max. Mark: 100**

**(Write answers in Answer booklet only)**

**I.** केचन पञ्च प्रश्नाः समाधेयाः । **5x20=100**

(१) दायस्य दायभागस्य च व्युत्पत्तिं पदर्श्य नारदोक्तं दायभागलक्षणं व्याख्यात ।

(२) पितृधनविभागकालं पितामहधनविभागकालञ्च जीमूतवाहनोक्तदिशा लिखत ।

(३) स्त्रीधनानि कानि तेषां स्वरूपं प्रतिपादयत ।

(४) पितापुत्रयोः धनविभागप्रकारं ग्रन्थोक्तदिशा विचारयत ।

(५) केषां दायग्रहणेऽधिकारो नास्ति तान् प्रदर्शयत ।

(६) विद्याधनस्य स्वरूपं विलिख्य तानि विभाज्यान्यविभाज्यानि वेति विवेचयत ।

(७) अपुत्रधनाधिकारिणां क्रमं निरूपयत ।

(८) जीमूतवाहनदिशा वृत्तविभागसन्देहे निर्णयहेतून् विवृणुत ।

(९) स्वत्वं लौकिकं शास्त्रैकसमधिगम्यं वेति जीमूतवाहनदिशा प्रतिपादयत ।

(१०) विभागकाले निह्नुतस्य पश्चादागतस्य विभागप्रकारं विवेचयत ।

**000**

Roll No Code No: 9175155

# Directorate of Distance Education
# Acharya First Year Annual Examination May, 2017
# Paper - 5, Dharmashastra

(याज्ञवल्क्यस्मृतेः व्यवहाराध्यायः, मिताक्षरासहितः)

**Time : 3 hrs.** **Max. Mark: 100**

**(Write answers in Answer booklet only)**

**I.** केचन पञ्च प्रश्नाः समाधेयाः । **5x20=100**

(१) व्यवहारस्य लक्षणमुल्लिख्य मिताक्षरादिशा व्याख्यात ।

(२) नृपेणाधिकृताः पूगाः श्रेणयोऽथ कुलानि च ।

पूर्वं पूर्वं गुरु ज्ञेयं व्यवहारविधौ नृणाम्।। इति श्लोकं विज्ञानेश्वरोक्तदिशा व्याख्यात ।

(३) सीमाभेदान् प्रदर्श्य सीमाविवादे निर्णयं प्रतिपादयत ।

(४) प्रमाणभेदान् प्रदर्श्य कुत्र कीदृशं प्रमाणं ग्राह्यं तन्मिताक्षरादिशा विवृणुत ।

(५) उपनिधि-निक्षेपयोः वाक्पारुष्य-दण्डपारुष्ययोः, स्तेय-साहसयोः, द्यूत-समाह्वययोश्च पारस्परिकभेदं प्रदर्शयत ।

(६) दुष्टलक्षणमुल्लिख्य व्याख्याय च प्रतिभूभेदान् यथाग्रन्थं पर्यालोचयत ।

(७) विभागात् स्वत्वं सतो विभागो वेति विज्ञानेश्वरदिशा प्रमाणयत ।

(८) अपुत्रधनविभागक्रमं मिताक्षरादिशा निर्दिशत ।

(९) स्वामिपालविवादाख्यं विवादपदं निरूपयत ।

(१०) विवादपदेषु ऋणादानस्य वैशिष्ट्यं प्रतिपादयत ।

**000**